आचार्य चतुर्थसत्रार्द्धः

- चतुर्थ पत्रम्

1.निरुक्तं श्रोत्रमुच्यते इति सविस्तरेण स्पष्टयत?

षट्सु वेदाङ्गेषु निरुक्तं चतुर्थस्थानं भजते । तच्च वेदपुरुषस्य श्रोत्रमुच्यते । 'निरुक्तं श्रोत्रमुच्यते' इति पाणिनीयशिक्षायांस् पष्टमुद्घोषितम् । अस्मिन् विषये वेदभाष्यकारा: सायणाचार्या: स्वचतुर्वेदभाष्यभूमिकायां कथयन्ति यत्—'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्' इति । निरुक्तस्य शाब्दिकीनिरुक्तिरेव-भविष्यति—निःशेषादुक्तमिति निरुक्तम् । अतो यदि शिक्षादीनि वेदाङ्गानि वेदस्य बाह्यानि तत्त्वानि निरूपयन्ति तदा निरुक्तं वेदविज्ञानस्यान्तरिकं स्वरूपं स्पष्टत: उद्घाटयति । एतदपि अस्य वैशिष्ट्यं विद्यते यदन्यानि वेदाङ्गानि प्रायो विभिन्नेषु सूत्रेषु लिखितानि सन्ति, इदञ्च निरुक्तं गद्यशैलीं भजते । अन्यच्च वेदार्थस्यावगमे निघण्टोरनन्तरं निरुक्तमेव प्रमाणम् । निरुक्तं निघण्टो: भाष्यभूताटीका विद्यते । निघण्टौ वेदस्य काठिन्यं भजतां शब्दानां समुच्चयो वर्तते । वैदिककोश इत्यपि कथयितुं पारयामो वयम् । निघण्टो: संख्याविषये पर्याप्तमतभेदो दृश्यते । साम्प्रतं समुपलब्धो निघण्टु: एक एवास्ति अस्योपरि च महर्षि-यास्कविरचितं निरुक्तमस्ति । केचन विद्वांस: यास्कं ऋषिप्रवरमेव निघण्टोश्चापि रचयिता अस्तीति स्वीकुर्वन्ति । परञ्च प्राचीनपरम्पराया अनुशीलनेनेयं धारणा प्रमाणिता न भवति । निरुक्तस्यारम्भे निघण्टुं समाम्नाय इति कथितो वर्तते । अस्य शब्दस्य च या व्याख्या दुर्गाचार्यमहाभागेन कृता, तया व्याख्यया तु अस्य प्राचीनत्वमेव सिद्ध्यति । महाभारतस्य मोक्षधर्मपर्वणि प्रजापति: कश्यपोऽस्य निघण्टो: रचयितृत्वेन ख्यापितो वर्तते । तथा च तत्रोक्तं यथा—

'वृषो हि भगवान् धर्म: ख्यातो लोकेषु भारत ।
निघण्टुकपदाख्याने विद्धि मां वृषमुत्तमम् ।।
कपिर्वराह: श्रेष्ठश्च धर्मश्च वृष उच्यते ।
तस्माद् वृषाकपिं प्राह कश्ययो मां प्रजापति:' ।।

वर्तमाने निघण्टौ 'वृषाकपि' शब्द: संगृहीतो विद्यते । अत: पूर्वोक्तकथनानुसार-मयमेव प्रतीयते यत्—महाभारतकाले प्रजापतिकश्यपोऽस्य निघण्टो रचयितृत्वेन ख्यापित: आसीत् । निघण्टौ पञ्चाध्याया: विद्यमाना: सन्ति । तेषु त्रयोऽध्याया: 'नैघण्टुककाण्डं, चतुर्थाध्यायो नैगमकाण्डं, पञ्चमाध्यायश्च 'दैवतकाण्ड'मिति च कथ्यते । प्रथमतस्त्रिष्वध्यायेषु तु पृथ्व्यादिबोधकानामनेकानां पदानामेकत्र संग्रहो विद्यते । द्वितीयं काण्डम् 'ऐकपदिक'मित्यपि कथयन्ति । 'नैगम'स्य तात्पर्यमिदमस्ति यत्—एषां प्रकृति-प्रत्यययो: यथार्थावगमनं न भवति । यथोक्तमस्ति अनवगत-संस्काराँश्च निगमान् । दैवतकाण्डे देवानां स्वरूपस्य स्थानस्य च निर्देशो विद्यते ।

2.निरुक्तस्य कालःस्पटयत?

ऐतिहासिकदृष्ट्या निघण्टुकालानन्तरं निरुक्तानां समयस्य शुभारम्भो भवति । अयमेव कालो निरुक्तयुगस्य । अस्मिन्नेव युगे निरुक्तस्य वेदाङ्गत्वं सिध्यति । श्रीमतो दुर्गाचार्यस्य दुर्गवृत्त्यनुसारं निरुक्तानां संख्या चतुर्दश आसीत् । तथा चोक्तं—'निरुक्तं चतुर्दशप्रभेदम्' इति । यास्कस्योपलब्धे निरुक्ते द्वादश निरुक्तकाराणां नामानि मतानि च निर्दिष्टानि सन्ति । अकारादिक्रमेण तेषां नामानि चेमानि सन्ति—

(१) अग्रायणः, (२) औपमन्यवः, (३) औदुम्बरायणः, (४) और्णवाभः, (५) कात्थक्यः, (६) क्रौष्टुकिः, (७) गार्ग्यः, (८) गालवः, (९) तैटीकिः, (१०) वार्ष्यायणिः, (११) शाकपूणिः, (१२) स्थौलाष्टीविः, (१३) त्रयोदशश्च निरुक्तकारः स्वयमेव यास्कः, चतुर्दशात्मको निरुक्तकारः क आसीदित्यद्यापि सन्दिग्ध एव । एषां निर्दिष्टानां निरुक्तकाराणां विशिष्टस्य मतस्य परिज्ञानं निरुक्तानामनुशीलनेन सम्यक्तया भविष्यति । विशिष्टज्ञानाय 'वैदिकवाङ्मयस्येतिहासे द्रष्टव्यः । एषु ग्रन्थकारेषु 'शाकपूणि' इत्यस्य मतं विस्तरेणोद्धृतमस्ति । बृहद्देवतायामपि एतन्मतं निर्दिष्टमस्ति । एवञ्च बृहद्देवतायां पुराणेषु च शाकपूणेः 'रथीतरशाकपूणि' इति नाम्ना स्मृतमस्ति । एते यास्कात् भिन्नं मतं स्वीकुर्वन्तीति विदुषामाशयः ।

3.यास्काचार्यस्य प्राचीनत्वं स्पष्टयत?

यास्कस्य प्राचीनतायां कस्यापि प्रकारस्य संशीतिलेशो नास्ति । इमे महानुभावा पाणिनेरपि प्राचीनतराः सन्ति । संस्कृतभाषायाः यो हि विकासः एतेषां निरुक्ते प्राप्यते, स च पाणिनीयाष्टाध्याय्यां व्याख्यातरूपात् प्राचीनतरः प्रतिभाति । महाभारतस्य शान्तिपर्वणि यास्कस्य निरुक्तकारत्वस्य सुस्पष्टो निर्देशो विद्यते । तद्यथा—

'यास्को मामृषिरव्यग्रो नैकयज्ञेषु गीतवान् ।
शिपिविष्ट इति ह्यस्माद् गुह्यनामधरो ह्यहम् ॥
स्तुत्वा मां शिपिविष्टेति यास्क ऋषिरुदारधीः ।
यत्प्रसादादधो नष्टं निरुक्तमभिजग्मिवान्' ॥

इत्युल्लेखमादाय वयमिति कथयितुं समर्थाः यत् यास्कस्य कालः वैक्रमात् सप्तम-अष्टम वा शतकात् पूर्वमासीत् । इत्यत्र कापि विचिकित्सा नास्ति । यास्कस्यास्य ग्रन्थस्य महनीयता अत्यधिका विद्यते ।

ग्रन्थस्यारम्भे यास्केन निरुक्तसिद्धान्तस्य वैज्ञानिकं प्रदर्शनं कृतम् । एषां काले वेदार्थस्यानुशीलनाय अनेके पक्षाः आसन्, येषां नामानि अधोलिखितानि सन्ति । तच्च यथा—(१) अधिदैवतम्, (२) अध्यात्मम्, (३) आख्यानसमयः, (४) ऐतिहासिकाः, (५) नैदानाः, (६) नैरुक्ताः, (७) परिव्राजकाः, (८) याज्ञिकाः । प्रस्तुतेनानेन निर्देशेन वेदार्थानुशीलनस्येतिहासे प्रभावोत्पादकत्व-

मायाति। अपरञ्च यास्कस्य प्रभावोऽवान्तरकालीनेषु वेदभाष्यकारेषु विशेषरूपेण दृश्यते। सायणेनास्याः पद्धतेः अनुसरणं कृत्वा वेदभाष्यरचनायां महत्साहाय्यं प्राप्तम्। यास्कस्येमां प्रक्रियामाधुनिकभाषाविदोऽपि स्वीकुर्वन्ति। अत एव विद्वत्सु ख्यातमस्ति यत् यास्कसदृशो भाषावैज्ञानिको विश्वस्मिन् दुर्लभ एवेति। सर्वे भाषावैज्ञानिकाः यास्कस्य ग्रन्थस्य महत्त्वं स्वीकुर्वन्ति। सैषा धारणा सर्वत्र प्रसृता विद्यते।

अन्यच्च निरुक्तं स्वयमेव भाष्यरूपं विद्यते, तथापि स्थाने स्थाने इयद्दुरूहं विद्यते यत् विदुषष्टीकाकारानपि तस्यार्थपरिज्ञानाय शिरसि वेदना जायते। तथापि तस्य पाठः यथार्थरूपेण परम्परया प्राप्तो न भवति। भाषायाः काठिन्येन सह तस्य पाठा अपि स्थाने स्थाने तथा भ्रष्टाः सन्ति यत्——दुर्गाचार्यसदृशं विद्वांसमपि काठिन्यस्यानुभवो जायते। वैक्रमशतकात् बहोः पूर्वं निरुक्तस्य व्याख्याकरणे विदुषां ध्यानमाकृष्टमासीत्। एतद् ज्ञानमस्मात् पतञ्जलेः महाभाष्याध्ययनेनैव भवति। अष्टाध्याय्याः ४।३।३६ इत्यस्य सूत्रस्य भाष्ये एते प्रतिपादयन्ति यत्——'शब्दग्रन्थेषु चैषा प्रभूततरा गतिर्भवति। निरुक्तं व्याख्यायते। न कश्चिदाह पाटलिपुत्रं व्याख्यायत इति'। 'न कश्चिदाह' इत्यनेन पतञ्जलेः संकेतः कं व्याख्यानं स्मारयति इत्यधुनापि न ज्ञायते।

4. निरुक्तस्य महत्वं लिखत?

वेदभाष्यकारस्य सायणाचार्यस्य मतानुसारं निरुक्तस्य लक्षणमस्ति—'अर्थाऽवबोधे निरपेक्षतया पदजातं यत्र तद् निरुक्तम्' अत्रायमाशयो विद्यते यत्—अर्थज्ञानाय स्वतन्त्ररूपेण यः पदानां संग्रहः स एव निरुक्तमिति कथ्यते ।

श्रीमद्दुर्गाचार्यस्य स्ववृत्तौ निरुक्तविषये कथनमस्ति यत् 'प्रधानं चेदमितरेभ्योऽङ्गेभ्यः सर्वशास्त्रेभ्यश्च अर्थपरिज्ञानाभिनिवेशात् । अर्थो हि प्रधानः, तद्गुणः शब्दः, स च इतरेषु व्याकरणादिषु चिन्त्यते । यथाशब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणात् । एवं शब्दार्थनिर्वचनपरिज्ञानं निरुक्तात्' इति । अपरञ्च कल्पे मन्त्राणां विनियोगस्य चिन्तनं भवति । यः मन्त्रः यमर्थं शब्दतः संस्कारे समर्थो भवति, तत्रैव तस्य प्रयोगो भवति । अनेन प्रकारेण कल्पोऽपि मन्त्राणामर्थानुसन्धानस्योपरि विनियोगस्य विधानं करोति । अतो निरुक्तं कल्पादपि अधिकस्य महत्त्वस्य विद्यते । अत्र चायं निष्कर्षः शब्दस्य लक्षणन्तु व्याकरणानुसारं क्रियते, परञ्च शब्दार्थयोश्च निर्वचनस्य ज्ञानं निरुक्तेनैव भवति । अनेन प्रकारेण निरुक्तं वेदार्थज्ञानाय नितान्तमावश्यकमस्ति । अपि चेदं व्याकरणशास्त्रस्य पूरकमस्ति ।

निरुक्ते वैदिकशब्दानां निरुक्तिर्विद्यते । निरुक्तिशब्दस्य चार्थो भवति व्युत्पत्तिरिति । निरुक्तस्येदं सर्वमान्यं मतमस्ति यत्—प्रत्येकः शब्दः येन केनापि धातुना सहावश्यमेव सम्बन्धितोऽस्ति । अतो निरुक्तकाराः शब्दानां व्युत्पत्तिं प्रदर्श्य धातुना सह विभिन्नप्रत्ययानां निर्देशं कथयन्ति । निरुक्तस्यानुसारं सर्वे शब्दाः व्युत्पन्नाः सन्ति । अर्थात् ते शब्दाः कस्मादपि न कस्माद् धातोः निर्मिताः सन्ति । सर्वे शब्दाः धातुजाः । वैयाकरणस्य शाकटायनस्यापि इदमेव मतमासीत् । अस्योल्लेखः यास्केन पतञ्जलिना च स्वग्रन्थेषु कृतः । शब्दानां व्युत्पत्तिरनेकविधा भवति । 'दूहिता' शब्दस्य व्युत्पत्तिविषये यास्कमहोदयाः लिखन्ति यत्—सा (दुहिता) पितुः सकाशाद् दूरे स्थितायामेव तस्य हितं करोति (दूरे = दूरदेशस्थितायामेव, हिता = हितकारिणी), अस्य शब्दस्य भिन्नार्थश्च—सा पितुः सकाशात् सर्वदा धनं द्रव्यं दोग्धि अथवा सा स्वयमेव गां दोग्धि ।

निरुक्तं यस्मिन् आधारे प्रवृत्तं भवति—अर्थात् प्रत्येकं संज्ञापदं धातोः व्युत्पन्नमभवत्, स आधारः नितान्तं वैज्ञानिको विद्यते । अद्यत्वे अस्यैव नाम विद्यते भाषाविज्ञानम् इति । अस्य विज्ञानस्योन्नतिः पाश्चात्य जगति १०० शतवर्षाभ्यन्तरे एवाभूत् । साप्युन्नतिः संस्कृतभाषायाः पाश्चात्यदेशे (यूरोपे) प्रचालितायां सति । परञ्च ध्यातव्यमत्राद्यतः सहस्त्रत्रयवर्षपूर्वं वैदिकैः ऋषिभिः अस्य शास्त्रस्य सिद्धान्तानां वैज्ञानिकरीत्या निरूपितमासीत् । भाषाशास्त्रस्येतिहासे भारतवर्षमेव अस्य मूलोद्गमस्थानमस्ति, नात्र कोऽपि सन्देहावसरः । निरुक्तस्यारम्भेऽस्य विषयस्य येषां नियमानां प्रतिपादनमुपलब्धं भवति, तद्विशेषं महत्त्वं धारयति ।

5.निरुक्तस्य शैली कथमस्ति इति लिखत?

निरुक्तस्य शैली

निरुक्तं भाषाशास्त्रदृष्टया—एकमनुपमं रत्नमस्ति । निरुक्तस्य मान्यः सिद्धान्तोऽस्ति यत्—सर्वे शब्दाः नामधातोः उत्पन्नाः भवन्ति । वैयाकरणेषु केवलं शाकटायनस्यैव मतमिदमासीत् । तथा चोक्तम्—'सर्वं धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्' इति । अस्य मतस्य परीक्षणं समीक्षणं वा गार्ग्यनामकेन केनाप्याचार्येण महद्युक्तीनां बले कृतम् । येषां खण्डनं यास्केन प्रबलतरयुक्तिभिः कृतम् । कस्या अपि भाषायाः मूलं धातुरेव भवति । अस्य तथ्यस्य समुद्घाटनं यास्केनाद्यतः सहस्रत्रयवर्षपूर्वमेव कृतम् । एतत् तथ्यमाधुनिकतुलनात्मकभाषाशास्त्रस्य मेरुदण्डमस्ति । यास्केन स्ववैज्ञानिकमतस्य प्रस्थापनायै अनेका सबलाः युक्तयः प्रदत्ताः, याभ्यः परिचयः आवश्यको **विद्यते** ।

गार्ग्यस्याद्याऽऽपत्तिः 'वस्तुनः क्रियानुसारं नाम निर्धारणात् अनेकेषां वस्तूनामेका क्रिया सम्भवादनेकेषामेकं नाम सम्भविष्यति' । इत्येतदसङ्गतमस्ति । समानकर्मकर्तृषु जनेष्वपि तेनैव कर्मणा तेषु व्यक्तिविशेषस्य श्रेणीविशेषस्य वा नाम सम्भवति, सर्वेषां नहि । लोकव्यवहारस्येयमेव शैली विद्यते । तक्षणस्य परिव्रजनस्य च क्रियाणामनेकव्यक्तीनां कृतेऽपि तक्षणकर्तुर्नाम 'तक्षा' संन्यासिनश्च नाम 'परिव्राजक' इति विद्यते । अन्यस्य न । शब्दस्य स्वभाव एवेदृशो यत् कयापि क्रियया कस्याप्येकस्यैव वस्तुनः प्रतिपादनं करोति । नहि सर्वेषां वस्तूनां । एकेन वस्तुना अनेकेषां क्रियाणां योगे स्थितेऽपि कस्या अपि क्रियाया अनुसारं तन्नामकरणं भवति । एष शब्दस्य स्वभावस्तथा लोकप्रसिद्धो व्यवहारश्च विद्यते । 'तक्षा' 'परिव्राजक'श्चान्यक्रियासम्पादनम।प करोति । परञ्च क्रियायाः वैशिष्टयेन तक्षण-परिव्रजनक्रियानुसारमेव तयोः नामकरणमभूत् । निष्पन्नस्य नाम्नः आधारे वस्तुनः क्रियायाः परीक्षणं विचारो वाऽसङ्गतो न भवति । एतत् कारणम्, नाम्नो निष्पत्तावपि तस्य योगार्थस्य परीक्षणं भविष्यति, तथाहि 'भवति हि निष्पन्नेऽभिव्याहारे योगपरीष्टिः' इति निरुक्ते १।१४ । नाम्न्यनिष्पन्ने सति कस्यार्थपरीक्षणं भविष्यति ? अत्राह—'प्रथनात् पृथिवी' विस्तृतत्वात् पृथिव्या इदं नाम विद्यते । शाकटायनस्यास्यां व्याख्यायां गार्ग्यस्यैतत् कथनं नितान्तम-

युक्तिकमस्ति यत्—एतत् केन विस्तृतमथवा कस्मिन् आधारे स्थितेन जनेन एतद् विस्तृतम् । एतत्सर्वं तर्कहीनमस्ति । यतो हि पृथ्व्याः पृथुत्वन्तु प्रत्यक्षदृष्टमस्ति । अस्य प्रथनस्य विषये प्रश्न एव व्यर्थो विद्यते । अतः गार्ग्यस्येयमप्यापत्तिः सुसङ्गता नास्ति ।

शाकटायनेन पदानां निरुक्त्यै एकस्याभिन्नपदस्य व्याख्याऽनेकेषां धातूनां योगेन निष्पादिता । अपरश्च शाकटायनेन 'सत्य'शब्दः प्रकारद्वयेण सिद्धयति । प्रथमन्तावत्—सति + यत् (तद्धितान्तः), द्वितीयं—सन्तम् + एति + अच् (कृदन्तः) । अर्थात् यद्विद्यमानस्यार्थस्य (यथार्थस्य) ज्ञानं करोति तदेव सत्यमस्ति । अस्मिन् विषये गार्ग्यस्य महत्यापत्तिर्विद्यते । यास्कस्योत्तरमस्ति यत्—शब्दान् त्रोटितेऽपि मर्दितेऽपि विखण्डितेऽपि च शाकटायनस्य निरुक्तिः अनुगतार्था विद्यतेऽतोऽमान्या न । अनन्वितेऽर्थे शब्दस्य संस्कारकः पुरुषः निन्दनीयो भवति न तु शास्त्रं तथा चोक्तं—'सैषा पुरुषगर्हा न शास्त्रगर्हा । निरुक्तैस्तथापदस्यान्वयत्वमेव न्याय्यमस्ति । तदर्थं पदविभाजनमनुचितं नास्ति । ब्राह्मणग्रन्थेष्वयं निरुक्तिक्रमः स्वीकृतः । न तु गर्हणीयः क्रमः । शतपथब्राह्मणेन 'हृदय'शब्दं त्रिषु भागेषु विभज्य तेषां निरुक्तिः क्रमशः हृ, दा, इण् धातुभ्यः प्रदर्शितः । फलतः शाकटायनस्य मतं यथार्थमस्ति ।

परभाविन्या क्रियया पूर्वजातवस्तूनां नामकरणं समुचितं नास्ति । गार्ग्यस्येयमापत्तिरप्यकिञ्चित्करी विद्यते । लोके परभाविन्या क्रियया पूर्वजातवस्तुनः संज्ञा व्यपदेशो वाऽनेकत्र दरीदृश्यते । भविष्यद्योगस्य सम्बन्धस्य वा सहयोगमवाप्य कस्यापि जनस्य 'बिल्वाद' तथा च 'लम्बचूडक' नामकरणं लोके भवति । मीमांसादर्शनस्याप्ययमेव सिद्धान्तः । रूढशब्दानामपि व्युत्पत्तिकरणमनावश्यकं भवति; इत्येतद् कथनमपि समुचितं नास्ति । वेदे रूढशब्दानां व्युत्पत्तिरनेकत्र दृष्टिगोचरी भवति—यदर्पत तद् सर्पिः । सर्पिषः (घृतस्य) व्युत्पत्तिः गमनार्थंकस्य सृप् धातोः निष्पन्ना भवति ।

तदित्थं यास्केन विविधप्रपञ्चितयुक्तिव्यूहेन स्पष्टतः प्रतिपादितं यत्—समस्तानि नामानि धातुजानि सन्ति, वर्तमानस्य भाषाशास्त्रस्य चायमेव मान्यः सिद्धान्तो विद्यते ।

धन्यवाद:

- डॉ धर्मेन्द्रकुमारपाठकः
- जयपुरपरिसरः